# नलोपाख्यानं ३

बृहदश्व उवाच ।

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।

अथैनान्परिपप्रच्छ कृताञ्जलिरवस्थितः ॥१ ॥

के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।

किं च तत्र मया कार्यं कथयध्वं यथातथम् ॥२ ॥

एवमुक्ते नैषधेन मघवान्प्रत्यभाषत ।

अमरान्वै निबोधास्मान्दमयन्त्यर्थमागतान् ॥३ ॥

अहमिन्द्रो ऽयमग्निश्च तथैवायमपांपतिः ।

शरीरान्तकरो नृणां यमो ऽयमपि पार्थिव ॥४ ॥

स वै त्वमागतानस्मान्दमयन्त्यै निवेदय ।

लोकपालाः सहेन्द्रास्त्वां समायान्ति दिदृक्षवः ॥५ ॥

प्राप्तुमिच्छन्ति देवास्त्वां शक्रो ऽग्निर्वरुणो यमः ।

तेषामन्यतमं देवं पतित्वे वरयस्व ह ॥६ ॥

एवमुक्तः स शक्रेण नलः प्राञ्जलिरब्रवीत् ।

एकार्थसमवेतं मां न प्रेषयितुमर्हथ ॥७ ॥

देवा ऊचुः ।

करिष्य इति संश्रुत्य पूर्वमस्मासु नैषध ।

न करिष्यसि कस्मात्त्वं व्रज नैषध माचिरम् ॥८ ॥

बृहदश्व उवाच ।

एवमुक्तः स देवैस्तैर्नैषधः पुनरब्रवीत् ।

सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ॥९ ॥

प्रवेक्ष्यसीति तं शक्रः पुनरेवाभ्यभाषत ।

जगाम स तथेत्युक्त्वा दमयन्त्या निवेशनम् ॥१० ॥

ददर्श तत्र वैदर्भीं सखीगणसमावृताम् ।

देदीप्यमानां वपुषा श्रिया च वरवर्णिनीम् ॥११ ॥

अतीव सुकुमाराङ्गीं तनुमध्यां सुलोचनाम् ।
आक्षिपन्तीमिव च भाः शशिनः स्वेन तेजसा ॥१२॥

तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीम् ।
सत्यं चिकीर्षमाणस्तु धारयामास हृच्छयम् ॥१३॥

ततस्ता नैषधं दृष्ट्वा संभ्रान्ताः परमाङ्गनाः ।
आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥१४॥

प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।
न चैनमभ्यभाषन्त मनोभिस्त्वभ्यचिन्तयन् ॥१५॥

अहो रूपमहो कान्तिरहो धैर्यं महात्मनः ।
को ऽयं देवो नु यक्षो नु गन्धर्वो नु भविष्यति ॥१६॥

न त्वेनं शक्नुवन्ति स्म व्याहर्तुमपि किं चन ।
तेजसा धर्षिताः सर्वा लज्जावत्यो वराङ्गनाः ॥१७॥

अथैनं स्मयमानेव स्मितपूर्वाभिभाषिणी ।
दमयन्ती नलं वीरमभ्यभाषत विस्मिता ॥१८॥

कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।
प्राप्तो ऽस्यमरवद्वीर ज्ञातुमिच्छामि ते ऽनघ ॥१९॥

कथमागमनं चेह कथं चासि न लक्षितः ।
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः ॥२०॥

एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
नलं मां विद्धि कल्याणि देवदूतमिहागतम् ॥२१॥

देवास्त्वां प्राप्तुमिच्छन्ति शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतिं वरय शोभने ॥२२॥

तेषामेव प्रभावेन प्रविष्टो ऽहमलक्षितः ।
प्रविशन्तं हि मां कश्चिन्नापश्यन्नाप्यवारयत् ॥२३॥

एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः ।
एतच्छ्रुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि ॥२४॥